**M.A. 4th Semester Examination, 2021**
**SANSKRIT**
**(Vyāpti in Tattvacintāmaṇi)**
**Paper: SNSK 403ED**
**Course ID: 40953**

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answer in their own words as far as practicable.*

**1.** अधोलिखितेषु एकः प्रश्नः समाधेयः । **10×1=10**

क) सिद्धान्तलक्षणं यथाग्रन्थं समासेन प्रतिपाद्यताम्।

ख) साध्याभाववदवृत्तित्वम् इत्यत्र साध्याभावनिष्ठाधेयतावच्छेदकसम्बन्धस्वरूपं प्रतिपाद्यताम्।

ग) जगदीशदिशा प्रमेयवह्वान् धूमादित्यत्र परिष्कृतव्याप्तिसिद्धान्तलक्षणस्याव्याप्तिं प्रदर्श्य तन्निरासः कार्यः।

**2.** यथेच्छं प्रश्नचतुष्टयं समाधेयम्। **5X4=20**

क) किमर्थं रघुनाथशिरोमणिना मूलं सिद्धान्तलक्षणं परिवर्तितम् ?

ख) साध्यतावच्छेदकभिन्नो यः साध्यनिष्ठो धर्मस्तदनवच्छेद्या तु प्रतियोगिता किमर्थं सिद्धान्तलक्षणे न निवेश्या ?

ग) हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतायाः पर्याप्त्यधिकरणभिन्नत्वं साध्यतावच्छेदकस्य वाच्यमिति कश्चिदिति व्याख्यायताम्।

घ) साध्याभाववदवृत्तित्वम् इत्यस्य समासनिर्णये प्राचां पक्षमुपस्थाप्य नव्यमतं निरूपणीयम्।

ङ) साध्याभावाधिकरणवृत्त्यभावश्च तादृशवृत्तित्वसामान्याभावो बोध्यः - व्याख्यायताम्।

च) साध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः - व्याख्यायताम्।

छ) निरुक्तसाध्याभावत्वविशिष्टनिरूपिता या निरुक्तसंसर्गकनिरवच्छिन्नाधिकरणता तदाश्रयावृत्तित्वस्य विवक्षितत्वात् - व्याख्यायताम्।

**3.** अधस्स्थितेषु यथेच्छं पञ्चप्रश्नानाम् उत्तराणि लेख्यानि । **2×5 =10**

क) प्राचां नये व्याप्तेः पञ्चलक्षणानि कानि ? कुत्र च तेषामव्याप्तिः ?

ख) व्याप्तिनिरूपणे का सङ्गतिः?

ग) किं नाम विशिष्टसाध्यतावच्छेदकस्थलम् ?

घ) किं नाम शुद्धसाध्यतावच्छेदकस्थलम् ?

ङ) पर्याप्तिसम्बन्धविषये जगदीशगदाधरयोर्मते को भेदः ?

च) दण्डिमान् दण्डिसंयोगात् इत्यत्र दीधितिकृन्नये केन सम्बन्धेन किं साध्यतावच्छेदकम् ?

छ) साध्याभाववदवृत्तित्वम् इति व्याप्तिलक्षणे किमर्थं निरवच्छिन्नविशेषणम् ?